# नवम पाठः
# महाकविः माघः

मरुभूमिः राजस्थानं न केवलं वीराणां भक्तानाञ्च भूमिः अस्ति, अपितु विदुषां महाकवीनामपि भूमिः। संस्कृतसाहित्ये 'बृहत्त्रयी' इति नाम्ना प्रसिद्धानि, त्रीणि महाकाव्यानि सन्ति– भारविकवेः 'किरातार्जुनीयं' माघस्य 'शिशुपालवधं' श्रीहर्षस्य च 'नैषधीयचरितम्'।

एषु शिशुपालवधस्य रचयितामहाकवेः माघस्य जन्म राजस्थानस्य जालौर–जनपदान्तर्गते भीनमालनगरे श्रीमालीब्राह्मणपरिवारे अभवत्। भीनमालनगरस्य पुरातनं नाम 'भिन्नमाल' इति आसीत्। श्रीमालीब्राह्मणानां बाहुल्यात् अस्य क्षेत्रस्य अपरं नाम 'श्रीमालक्षेत्रम्' अपि आसीत्।

माघस्य पितामहः सुप्रभदेवः वर्मलातनामकस्य राज्ञः प्रधानमन्त्री आसीत्। माघस्य पिता दत्तकः विद्वान् दानशीलः चासीत्। दत्तकस्य गृहे विक्रमस्य सप्तम–शताब्द्यां माघस्य जन्म अभवत्। पितृवत् माघोऽपि विद्वान् दानशीलः च। भोजप्रबन्धनाम्नि ग्रन्थे माघस्य जीवनवृत्तं लिखितमस्ति। राजा भोजः माघस्य आश्रयदाता मित्रं चासीत्। एकदा दानशीलः माघ निर्धनः जातः। माघस्य पत्नी एकां कवितां स्वीकृत्य भोजसमीपे गच्छति। भोजः तस्यै प्रभूतं धनं ददाति। यदा सा गृहं प्रति आगच्छति तदा मार्गे याचकेभ्यः सर्वं धनं ददाति। रिक्तहस्ता सा गृहम् आगच्छति। तदानीम् अपि गृहस्य द्वारे बहवः याचकाः आसन्। याचकानां कृते माघस्य समीपे धनं न आसीत्, अतएव सः बहु–दुःखितः भूत्वा स्वप्राणान् एव अत्यजत्।

माघेन 'शिशुपालवधं' इति एकमेव महाकाव्यं लिखितम्। अस्य कथायाः आधारः महाभारतम् (सभा पर्वः) अस्ति। विंशतिः सर्गात्मकेऽस्मिन् महाकाव्ये १६५० श्लोकाः सन्ति। अस्य कथानकं महाभारतात् गृहीतमस्ति। वीररसः मुख्यरूपेण अस्ति। महाकाव्यस्यास्य नायकः श्रीकृष्णः। माघकाव्यस्य वर्णनशैली यद्यपि महाकविभारविमनुकरोति, तथापि प्रौढरचनाशैली प्राञ्जलाभिव्यक्तिः माधुर्यमयपदगुम्फनञ्च माघकाव्ये विशिष्टाञ्चमत्कृतिं प्रकटयति। विद्वद्भिः कालिदासस्य कृतिषु उपमानां प्राधान्यं, भारवेः काव्ये अर्थगौरवस्य वैशिष्ट्यं, दण्डिनश्च दशकुमारचरिते पदलालित्यं स्वीकृतम्, माघस्य कृतौ शिशुपालवधे तु त्रयाणामपि गुणानामेकत्र समावेशोऽस्ति।

वस्तुतः माघस्य काव्ये उपमा, अर्थगौरवं पदलालित्यञ्च त्रयो गुणाः सन्ति ।अत एव कथ्यते–

**''उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

अस्य सूक्तकथनस्याऽयं भावो यदसौ माघः काव्यकलायामतिनिपुणः प्रतिभाविलाससमन्वितश्च आसीत्। अस्य महाकाव्ये यथा भावपक्षः प्रशस्यः, तथैव कलापक्षोऽपि प्रशस्यातिप्रशस्यतमः। अलङ्काराणां

प्रयोगे, छन्दोरचनाकौशले, व्याकरणनैपुण्यप्रदर्शने, कोमलकान्तपदावल्याः संधाने, शास्त्रीयज्ञानप्रतिपादने च माघः सर्वानपि अन्यान् कवीन् अतिशेते। अयं नीतिशास्त्रनिपुणो दर्शनशास्त्रपारङ्गतः सङ्गीतस्वरसाधकश्च सिध्यति, यतो ह्यस्य महाकाव्ये चमत्कारजननमेव यदि मधुरं किमपि तत्त्वं भवति तत्रापि माघः प्राथम्यं भजते।

कालिदासस्य यथा मेघदूतं प्रसिद्धम् तथैव माघस्य काव्यमिदमपि प्रसिद्धमस्ति। द्वयोः काव्ययोः सौन्दर्यं दृष्ट्वा एव उक्तम् यद्– **'मेघे माघे गतं वयः।'** महाकविः माघेन शिशुपालवधमहाकाव्यस्य प्रथमनवसर्गेषु स्व अक्षय शब्दकोषस्य पूर्ण प्रदर्शनं कृतम्। तेन प्रयत्नपूर्वकं एकस्य भावस्य कृते अथवा भिन्न-भिन्नार्थस्य कृते नूतनशब्दानां प्रयोगः कृतः। अतएव कथ्यते– **'नवसर्गगते माघे नवशब्दो न विद्यते।'**

समीक्षकाणां दृष्टावपि माघ एव श्रेष्ठः अस्ति। तेषामनुसारेण भारवेः शोभाः माघस्योदयात् पूर्वम् इति यावदेव अस्ति। अत एव उच्यते– **'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।'**

माघस्योपमावैशिष्टस्य उदाहरणं –

**उदयति वितोर्ध्वरश्मिरज्जा बहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बि-घण्टा-द्वय-परिवारित-वारणेन्द्र-लीलाम्।।**

अयं दृष्ट्वा एव माघः 'घण्टामाघः' इति नाम्ना प्रसिद्धोऽभूत्। माघस्यार्थगौरवस्य सौन्दर्यमपि दृश्यते यथा– **'महीयांसः प्रकृत्या मितभाषिणः', 'सर्वः स्वार्थं समीहते', 'समय एव करोति बलाबलम्' 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'।**

पदलालित्यस्य वैशिष्ट्यमपि एकस्मिन् श्लोके दृश्यतेऽत्र–

**मधुरया मधुबोधितमाधवी, मधुसमृद्धिसमेधितः-मेधया।**
**मधुकराङ्गनया मुहुरुन्मद- ध्वनिभृता निभृताक्षरमुज्जगे।।**

संक्षेपतः स्पष्टमेव यन्माघः काव्यनिर्माणे यथा कलापक्षमुत्कृष्टतमं स्वीकरोति तथापि भावपक्षदृष्ट्या अस्य लेखनीं सुललितं माधुर्यपूर्णञ्चास्ति। संस्कृतसाहित्ये बृहत्त्र्यामस्य महाकाव्यस्य गणना क्रियते। सुरभारतिसमुपासकानां कृतेऽयं महाकविर्माघः परमसमादरणीयः।

## शब्दार्थाः

| | | |
|---|---|---|
| **मरुभूमिः** | = | मरुस्थलम् (रेगिस्तान) |
| **बृहत्त्रयी** | = | त्र्याणां विशालकाव्यानां समूहः |
| **पुरातनम्** | = | प्राचीनम् |
| **अपरम्** | = | द्वितीयम् (अन्य, दूसरा) |
| **राज्ञः** | = | नृपस्य (राजन् शब्द, षष्ठी, एकवचनम्) |
| **प्रभूतम्** | = | अत्यधिकम् |
| **याचकेभ्यः** | = | भिक्षुकेभ्यः (याचक शब्द, चतुर्थी, बहुवचनम्) |

| | | |
|---|---|---|
| **रिक्तहस्ता** | = | रिक्तं हस्तं यस्याः सा |
| **बहवः** | = | बहु शब्द, प्रथमा, बहुवचनम् |
| **अत्यजत्** | = | त्यज् धातु, लङ्लकार प्रथमपुरुषः, एकवचनम् |
| **तथैव** | = | तद्वत्, तथा + एव (वृद्धि सन्धिः) |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. भारविकवेः रचना अस्ति–

(क) किरातार्जुनीयम् (ख) शिशुपालवधम्

(ग) नैषधीयचरितम् (घ) मेघदूतम् ( )

२. माघस्य पितुः नाम आसीत्–

(क) सुप्रभदेवः (ख) दत्तकः

(ग) भोजः (घ) विक्रमः ( )

३. माघस्य जीवनवृत्तं लिखितम् अस्ति –

(क) शिशुपालवधे (ख) मेघदूते

(ग) भोजप्रबन्धे (घ) किरातार्जुनीये ( )

४. माघस्य आश्रयदाता आसीत् –

(क) वर्मलातः (ख) सुप्रभदेवः

(ग) विक्रमः (घ) भोजः ( )

५. शिशुपालवधे सर्गाः सन्ति–

(अ) विंशतिः (ब) त्रयः

(स) अष्टादश (द) षोडश ( )

### लघूत्तरात्मकप्रश्नाः –

१. राजस्थानं कीदृशानां जनानां भूमिः अस्ति?

२. माघस्य जन्म कुत्र अभवत्?

३. शिशुपालवधस्य नायकः कः अस्ति?

४. शिशुपालवधस्य कथायाः आधारः किम् अस्ति?

५. माघस्य काव्ये कति गुणाः सन्ति?

## निबन्धात्मकप्रश्नाः –

१. माघस्य जीवनवृत्तस्य वर्णनं कुरुत।

२ शिशुपालवधस्य काव्यवैशिष्ट्यं लिखत।

## व्याकरणात्मक प्रश्नाः –

**१. अधोलिखितपदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| अभवत् | भू | लङ् | प्रथमः | एकवचनम् |
| आसीत् | .................... | .................... | .................... | .................... |
| आसन् | .................... | .................... | .................... | .................... |
| अस्ति | .................... | .................... | .................... | .................... |
| सन्ति | .................... | .................... | .................... | .................... |
| गच्छति | .................... | .................... | .................... | .................... |
| ददाति | .................... | .................... | .................... | .................... |
| अत्यजत् | .................... | .................... | .................... | .................... |

२. अधोलिखितपदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत-

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| माघस्य | माघ | षष्ठी | एकवचनम् |
| नगरस्य | .................... | .................... | .................... |
| दत्तकस्य | .................... | .................... | .................... |
| भक्तानां | .................... | .................... | .................... |
| वीराणां | .................... | .................... | .................... |
| कवेः | .................... | .................... | .................... |
| विदुषां | .................... | .................... | .................... |
| गृहे | .................... | .................... | .................... |
| याचकेभ्यः | .................... | .................... | .................... |

**३. अधोलिखितपदेषु प्रत्ययस्य निर्देशनं कुरुत-**

लिखितम्- लिख् + क्त

जातः – ........................ + ......................

| | | | | |
|---|---|---|---|---|
| स्वीकृत्य | – | ...................... | + | ...................... |
| भूत्वा | – | ..................... | + | ..................... |
| दृष्ट्वा | – | ...................... | + | ...................... |

४. **अधोलिखितपदेषु समासविग्रहं कृत्वा समासस्य नामनिर्देशनं कुरुत–**

| | | | |
|---|---|---|---|
| आश्रयदाता | – | आश्रयस्य दाता | (षष्ठी तत्पुरुष:) |
| भोजसमीपे | – | .............................. | ...................... |
| अर्थगौरवं | – | .............................. | ...................... |
| पदलालित्यं | – | .............................. | ...................... |
| जीवनवृत्तं | – | ............................... | ...................... |

५. **अधोलिखितपदेषु काल ( लकार ) परिवर्तनं कुरुत–**

| | | | |
|---|---|---|---|
| अभवत् | – | (लट्) | भवति |
| आसीत् | – | (लट्) | ...................... |
| गच्छति | – | (लङ्) | ...................... |
| अत्यजत् | – | (लट्) | ...................... |
| ददाति | – | (लृट्) | ...................... |
| आगच्छति | – | (लृट्) | ..................... |
| सन्ति | – | (लङ्) | ...................... |

६. **अधोलिखितपदेषु वचनपरिवर्तनं कुरुत–**

| | | | |
|---|---|---|---|
| कवे: | – | (बहुवचनम्) | कवीनाम् |
| भक्तानां | – | (एकवचनम्) | ................... |
| वीराणां | – | (एकवचनम्) | ................... |
| विदुषां | – | (एकवचनम्) | ................... |
| राज्ञ: | – | (बहुवचनम्) | ................... |
| याचकेभ्य: | – | (एकवचनम्) | ................. |

७. **अधोलिखितशब्दानाम् आधारेण वाक्यनिर्माणं कुरुत–**

| | | |
|---|---|---|
| एकदा | – | माघ: एकदा निर्धन: जात:। |
| प्रभूतं | – | ........................................................................................। |
| विंशति: | – | ........................................................................................। |

त्रयः – ..........................................................................................।

यदा–तदा– ..........................................................................................।

तथैव – ..........................................................................................।

कति – ..........................................................................................।

अपरं – ..........................................................................................।

८. **अधोलिखितानाम् उत्तराणामाधारेण प्रश्ननिर्माणं कुरुत–**

उदा. – माघस्य जन्म भीनमालनगरे अभवत।

प्रश्नः– माघस्य जन्म कुत्र अभवत् ?

१. भीनमालनगरस्य पुरातनं नाम भिन्नमाल इति आसीत्।

**प्रश्नः**– ..........................................................................................?

२. माघः विद्वान् दानशीलः च आसीत् ।

**प्रश्नः**– ..........................................................................................?

३. शिशुपालवधे मुख्यरूपेण वीररसः अस्ति।

**प्रश्नः**–..........................................................................................?

४. कालिदासस्य मेघदूतं प्रसिद्धम् अस्ति।

**प्रश्नः**– ..........................................................................................?

५. माघस्य पितामहः सुप्रभदेवः आसीत्।

**प्रश्नः**– ..........................................................................................?

❀ ❀ ❀